**कोर** पु० कुल—संस्याने अच् लस्य रः । १संस्थानवति कोरका कारे सुश्रुतोक्ते देहस्थसन्धिभेदे यथा "त एते सन्धयोऽष्टविधाः । कोरोदूखलसामुद्गप्रतरतुन्नसेवनीवायसतुण्डमण्डलशङ्खावर्त्ताः । तेषामङ्गुलिमणिबन्धगुल्फजानुकूर्परेषु कोराः सन्धयः" । "नामभिरेवाकृतयः व्याख्याताः" । कुल—घञ् । २संस्थाने पु०

**कोरक** पुंन० कुल-संस्याने ण्वुल् लस्य रः । कलिकायाम् । "कलिका कोरकः पुमानित्यमरोक्तिः प्रायिकाभिप्राया"कोरकं कुड्मलेऽपि स्यात् कक्कोलकमृणालयोः" विश्वोक्तेः तेन "समुपहरन् विचकार कोरकाणि" माघे क्लीव प्रयोगः "कोरकोऽस्त्री कुड्मले स्यात्" मेदि० । २कक्कोले ३मृणाले च विश्वः । ४चोरनामगन्धद्रव्ये जटाध० । ततः तारका० संजातेऽर्थे इतच् । कोरकित जातमुकुले त्रि०

**कोरङ्गी** स्त्री० कुर—अङ्गच् गौरा० ङीष् । १सूक्ष्मैलायाम् (छोटएलाइच्) अमरः २पिप्पल्यां राजनि०

**कोरदूष** पु० कोरं संस्यानं दूषयति दूषि णिच् अण् उप० स० । (कोँदो) ख्याते व्रीहिभेदे अमरः । "निशापष्टिकयवगोधूमकोरदूषेत्यादि" सुश्रु० "श्यामाककोरदूषान्नं तक्रं पिण्याकसक्तुभिः" सुश्रु० । ण्वुल् । कोरदूषकोऽप्यत्रार्थे । "इङ्गोभविता लोको युगान्ते पर्य्युपस्थिते । वस्त्राणां प्रवरा शाणी धान्यानां कोरदूषकः" भा०व०१९०अ०

**कोल** पु० कुल—संस्याने अच् । १सूकरे २प्लवे(भेला) अमरः ३क्रोड़े ४शनिग्रहे ५चित्रके (चिता) ६अङ्कपालौ ७आलिङ्गने मेदि०। ८देशभेदे पु०ब०व० शब्दरत्ना०९।अस्त्रभेदे पुं० धर० "नेटान् धीवरकन्याजाते १०जातिभेदे ब्रह्मवै० पु० । ११नृपभेदे "करूथामादयाक्रीडश्चत्वारस्तस्य चात्मजाः । पाण्ड्यश्च केरलश्चैव कोलश्चोलश्च पार्थिवः । तेषां जनपदाःस्फीताः पाण्ड्याः कोलाः सकेरलाः" हरिवं०३२अ०। १२मरिचे न० राजनि० १३चव्ये(चइ)वैद्य० । १४तोलकपरिमाणे वैद्यकम् । १५कर्कन्धूवृक्षे स्त्री० गौरा० ङीष् । तस्याः फलम् अण् तस्य लुक् ।१६बदरीफले न०। कर्कन्धूशब्दे विवृतिः "बदरीसदृशाकारोवृक्षः सूक्ष्मफलोभवेत् । अटव्यामेव सा घोण्टा कोलवोण्टेति योच्यते" सुभूतिः "हस्तिकोलिर्गोपघोण्टा घोण्टा च बदरीच्छदा । शृगालकोलिः कर्कन्धूः" रत्नकोषः "आद्यकोलतुलितप्रकाशनैः" । "यः कोलतां बलवतामुबिभ्रत्"माघः । कोलवृक्षश्च सुश्रुते अम्लवर्गे उक्तः । तच्च वाक्यं ३३३पृ० दृश्यम्

**कोलक** पु० कुल—ण्वुल् । १अङ्कोठवृक्षे, राजनि० २बकुलवृक्षे जटाधरः (कांकला)च ३गन्धद्रव्यभेदे, ४मरिचे, ५कक्कोले च न० अमरः ।

**कोलकन्द** पु० कोलइव कन्दोऽस्य । महाकन्दभेदे राजनि० "कोलकन्दः कटूष्णश्च कृमिशोथविनाशनः । वस्तिच्छर्दिप्रशमनः विषदोषानिलापहः" राजनि०

**कोलकर्कटिका** स्त्री० कोलइव कर्कटिका । मधुखर्ज्जूरिकायां राजनि०

**कोलघोण्टा** स्त्री । बदरीभेदे सुभूतिः । [द्रव्ये अमरः ।

**कोलदल** न० कोलं वदरीफलमिव दलमस्य । नखीनामगन्ध-

**कोलगिरि** पु० दक्षिणदिक्स्थे पर्वतभेदे "कृतस्नं कोलगिरिञ्चैव सुरभीपट्टनं तथा" भा० स० ३०अ० सहदेवदक्षिणदिग्विजये । कोलाचलादयोऽप्यत्र । कोलाचलमल्लिनाथेति तस्य विशेषणं तत्पर्वतस्थितत्वात् [वृक्षे हारा०

**कोलनासिका** स्त्री० कोलस्य सूकरस्य नासिकेव । रङ्गिणी-

**कोलपुच्छ** पु० कोलस्य सूकरस्येव पुच्छोऽस्य । कङ्कपक्षिणि हारा० । [ राजनि०

**कोलमूल** न० कोलं वदरीफलमिव मूलमस्य । पिप्पलीमूले

**कोलम्बक** पु० कुल—अम्बच् ओष्ठवमध्यः संज्ञायां कन् । तन्त्रीभिन्ने अलाबूप्रभृतिसमुदाये वीणायाः अवयवे भरतः

**कोलवल्ली** स्त्री० कोलोवराह इव वल्ली तल्लोमतुल्यशुङ्गावत्त्वात् । गजपिप्पल्याम् राजनि० । २सूकरपादिकायां राजनि०

**कोलशिम्बि** स्त्री कोलपादाकारा शिम्बिरस्याः । (आलकशीति) ख्यातायां सूकरपादिकायां लतायाम् । वा ङीप् । "कोलशिम्बी समीरघ्नी गुरूष्णा कफवातहृत् । शुक्राग्निसादकृद्रूक्षा रुचिकृत् बद्धविड् गुरुः" इति भावप्र०

**कोला** स्त्री कुल—ज्वला० ण टाप् ।१पिप्पल्याम्,२चव्ये (चइ) मेदि०३कोलिवृक्षे शब्दरत्ना० । ४कोलापुरे च

**कोलाञ्च** पु० ब० व० । देशभेदे शब्दरत्ना०

**कोलापुर** न० दक्षिणदेशप्रसिद्धे लक्ष्मीदेव्याः स्थाने पुरभेदे

**कोलाविध्वंसिन्** त्रि०कोलां पुरभेदे विध्वंसितुं वस्तुं शीलमस्य विशब्देन धातोरन्यार्थपरत्वम् । पर्वतवासिनि म्लेच्छभेदे, "एवं पालयतस्तस्य म्लेच्छाः पर्वतवासिनः । कोलाविध्वंसिनः प्राप्ताः" इति देवीभागवतम् । "कोलाविध्वंसिनस्तथेति"देवीमाहा०। कोलाशब्दः कोलाहलवाचकस्तथा च कोलाहलेनैव राज्यविध्वंसं ये कुर्वन्ति । २तेषु च ।

**कोलाहल** पु० कुल—घञ् तथाहलति अच् । बहुविधे दूरगामिन्यव्यक्ते शब्दे अमरः "शीघ्रं भेरीनिनादेन स्फुटकोलाहलेन वै" रामा०